**ताम्रपक्षा** स्त्री सत्यभामासुतायां ताम्रजाक्षशब्दे दृश्यम् ।

**ताम्रपट्ट** न० ताम्रनिर्मितं पट्टम् । ताम्रमये लेखनपत्रभेदे "दद्याद्भूमिं निबन्धं वा कृत्वा लेख्यञ्च कारयेत् । आगामिभद्रनृपतिपरिज्ञानाय पार्थिवः । पटे वा ताम्रपट्टे वा स्वमुद्रोपरिचिह्नितम् । अभिलेख्यात्मनो वंश्यानात्मानञ्च महीपतिः । प्रतिग्रहपरीमाणं दानाच्छेदोपवर्णनम् । स्वहस्तकालसम्पन्नं शासनं कारयेत् स्थिरम्" याज्ञ० ।

**ताम्रपत्र** पु० ताम्रं रक्तं पत्रमस्य । १जीवशाके राजनि० । २रक्तवर्णपत्रके वृक्षमात्रे च । कर्म्म० । ३ताम्रमये लेखनपत्रे । ४रक्ते दले नवपल्लवे च न० ।

**ताम्रपर्णी** स्त्री दक्षिणदेशस्थे नदीभेदे ।

"ताम्रपर्णीन्तु कौन्तेय ! कीर्त्तयिष्यामि तां शृणु यत्र देवैस्तपस्तप्तं महदिच्छद्भिराश्रमे । गोकर्ण इति विख्यातस्त्रिषु लोकेषु विश्रुतः । शीततोयो बहुजलः पुण्यस्तात ! शिवः शुभः । ह्रदः परमदुष्प्रापो मानुषैरकृतात्मभिः । तत्र वृक्षतृणाद्यैश्च सम्पन्नफलमूलवान् । आश्रमोऽगस्त्यशिष्यस्य पुण्यो देवसमो गिरिः । वैदूर्य्यपर्वतस्तत्र श्रीमान् मणिमयः शिवः । अगस्त्यस्याश्रमश्चैव बहुमूलफलोदकः" भा०व०८८अ० । तस्याः सिन्धुसङ्गमस्थाने मुक्ताजन्म यथोक्तं "ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः । ते निपत्य ददुस्तस्मै यशः स्वमिव सञ्चितम्" रघुः "सिंहलकपारलौकिकसौराष्ट्रकताम्रपर्णीकपारशराः" कौवेरपाण्ड्यवाटकहैमा इत्याकरा ह्यष्टौ" वृ० स० ८१ अ० मुक्ताकरोक्तौ । २शिलाभेदे च । "ताम्रपर्णी शिला राजन् ! श्रीमान् मलयपर्वतः" भा० भी० ६ अ० ।

**ताम्रपल्लव** पु० ताम्राणि पल्लवानि यस्य । १अशोकवृक्षे राजनि० । २रक्तपल्लवयुक्ते वृक्षमात्रे च । कर्म्म० । ३रक्ते पल्लवे अस्त्री ।

**ताम्रपाकिन्** पु० पच्यते पाकः फलपुष्पादि ताम्रः पाकः अस्त्यस्य इनि । गर्द्दभाण्डवृक्षे । रत्नमा० ।

**ताम्रपात्र** न० ताम्रस्य विकारः अण् कर्म० । ताम्रमये पात्रे तत्र तर्पणविधिस्तर्पणशब्दे उक्तः । "गृहीत्वौडुम्बरं पात्रम्" इत्यादि स्मृत्या तस्य संकल्पपात्रतोक्ता तत्र भोजननिषेधो मनुनोक्तो यथा "ताम्रपात्रे न भुञ्जीत भिन्नकांस्ये मलाविले । पलाशपद्मपत्रेषु गृही भुक्त्वैन्दवं चरेत्" । तत्र घृतेतरोद्धृतसारगव्यादिभोजननिषेधमाह स्मृतिसागरे स्मृतिः "नारिकेलजलं कांस्ये ताम्रपात्रे स्थितं मधु । गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना । ताम्रपात्रघृतं मांसं यच्च गव्यं घृतेतरत् । आमिषन्तु गवां मांसं दधि मद्यं पयो रजः । द्रव्यान्तरयुतं मांसं पयसा संयुतं दधि । पयोऽनुद्धृतसारञ्च ताम्रपात्रे न दुष्यति" उत्तरार्द्धानुसारात् "ततश्च संस्कृते वह्नौ गोक्षीरेण चरुं पचेत् । अस्त्रेण क्षालिते पात्रे नवे ताम्रमयादिके" शारदाति० वाक्यम् अनुद्धृतसारक्षीरविषयम् उद्धृतसारस्यैव तत्र स्थितत्वे निषेधात् पानपात्रं च ताम्रपात्रं प्रशस्तं यथाह सुश्रुतः "दद्यात् ताम्रमये पात्रे सुशीतं सुशृतं पयः" । "जलपात्रं तु ताम्रस्य तदभावे मृदो हितम्" भावप्र० ।

**ताम्रपादी** स्त्री ताम्रः रक्तः पादो मूलमस्याः ङीष् । हंसपद्याम् राजनि० । तस्या हंसस्येव रक्तमूलत्वात्तथात्वम् ।

**ताम्रपुष्प** पु० ताम्रं पुष्पं यस्य । १रक्तकाञ्चने जटा० २भूमिचम्पके शब्दच० । ३रक्तपुष्पयुक्तमात्रे त्रि० । "ताम्रपुष्पैश्च शिखरैर्दीप्यमानः सुतेजसा" हरिवं० २१७ अ० । कर्म्म० । ४रक्ते पुष्पे न० ।

**ताम्रपुष्पिका** स्त्री ताम्रं पुष्पं यस्याः कप् कापि अत इत्त्वम् । रक्तत्रिवृति (लालतेउड़ि) राजनि० ।

**ताम्रपुष्पी** स्त्री ताम्रं रक्तं पुष्पं यस्याः ङीष् । १धातकीवृक्षे २पाटलावृक्षे च राजनि० ।

**ताम्रफल** पु० ताम्रं रक्तं फलमस्य । १अङ्कोटवृक्षे । राजनि० । २रक्तफलयुक्ते वृक्षमात्रे त्रि० । कर्म्म० । ३रक्ते फले न० ।

**ताम्रमूला** स्त्री ताम्रं रक्तं मूलं यस्या अजादेराकृतिगणत्वात् टाप् । १दुरालभायां २लज्जालौ च राजनि० । ३कच्छुरावृक्षे (खिराइ) रत्नमाला । ४रक्तमूलके वृक्षमात्रे त्रि० । कर्म्म० । ५रक्ते मूले न० ।

**ताम्रयोग** पु० चक्रदत्तोक्ते औषधभेदे तद्विधानादि तत्रोक्तं यथा "स्थाल्यां संमर्द्य दातव्यौ माषिकौ रसगन्धकौ । नखक्षुण्णं तदुपरि तण्डुलीयं द्विमाषिकम् । ततो नैपालताम्रादि पिधाय सुकरालितम् । पांशुना पूरयेदूर्द्ध्वं सर्वां स्थालीं ततोऽनलः । स्थाल्यधो नालिकां यावद्देयस्तेन मृतस्य च । ताम्रो ताम्रस्य रत्येका त्रिफलाचूर्णरत्तिका । त्र्यूषणस्य च रत्येका विडङ्गस्य च तन्मधु । घृतेनालोड्य लेढव्यं प्रथमे दिवसे ततः । रत्तिवृद्धिः प्रतिदिनं कार्य्या ताम्रादिषु त्रिषु । स्थिरा विडङ्गरत्तिस्तु यदा भेदो विवक्षितः । तदा